# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.2.4.7** समयः – 3:00 तः 6:00

दिनाङ्कः –03/04/2019 सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे षष्ठसप्तमस्कन्धौ

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।** **10**

(1) सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥

(2) गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहङ्कृतः।
सर्वभूतसुहृत्साधुर्मितवागनसूयकः।

(3) साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः।

**प्रश्नः-2 अजामिलोपाख्यानं वर्णयत।** **10**

**अथवा**

**यमदूतविष्णुदूतानां संवादं सविस्तरं लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।** **10**

(1) अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः।
मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः ॥

(2) नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु।
यावद्यस्य हि सम्बन्धो ममत्वं तावदेव हि ॥

(3) न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा।
आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥

**प्रश्नः-4 वृत्रासुरवधकथां पूर्वापरसन्दर्भेण लिखत।** **10**

**अथवा**

**इन्द्रस्य ब्रह्महत्याप्रसङ्गं सविस्तरं लिखत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या। 10**

(1) यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात्।
न तथा भक्तियोगेन इति मे निश्चिता मतिः॥

(2) स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः।
उत्थाय तच्छीर्ष्णदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयम्॥

(3) शमो दमस्तपः शौचं सन्तोषः क्षान्तिराजधम्।
ज्ञानं दयाऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम्॥

**प्रश्नः-6 हिरण्यकशिपोः तपश्चर्यां वरदानप्राप्तिं यथाग्रन्थं लिखत। 10**

**अथवा**

**प्रह्लादचरितं सविस्तरं सोपदेशं वर्णयत।**

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तराणि लिखत। 10**

(1) सप्तमस्कन्धस्य लीलायाः नाम किम्?
(2) सप्तमस्कन्धे कति अध्यायाः?
(3) कस्योपदेशेन दक्षपुत्राः वैराग्यं प्राप्नोति?
(4) बृहस्पतिना कस्य सभायाः त्यागः कृतः?
(5) बृहस्पतेः स्थाने कः उपविशति?
(6) वृत्रासुरः कस्मात् शस्त्रात् वीरगतिं प्राप्नोति?
(7) इन्द्रस्य ब्रह्महत्यापापां कति भागेषु विभक्तं भवति?
(8) चित्रकेतवे कौ उपदिशतः?
(9) चित्रकेतुः कस्याः शापं प्राप्नोति?
(10) मरुद्गणानां सङ्ख्या का?
(11) हिरण्यकशिपुहिरण्याक्षयोर्मध्ये आदौ कस्य वधः भवति?
(12) हिरण्यकशिपुना नियुक्तौ द्वौ प्राध्यापकौ कौ?
(13) प्रह्लादः केभ्यः उपदेशं ददाति?
(14) प्रह्लादस्य गुरुः कः?
(15) आश्रमाः कति? के च ते?